# Upamanyukritam Shiva Stotram

# ઉપમન્યુકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Upamanyukritam Shiva Stotram

File name : upamanyukRRitaMshivastotraM.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shivAkhyaH chaturthAMshaH | adhyAyaH 12 | 19-41||

Latest update : August 20, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# ઉપમન્યુકૃતં શિવસ્તોત્રમ્

જય શઙ્કર પાર્વતીપતે મૃડ શમ્ભો શશિખણ્ડમણ્ડન ।
મદનાન્તક ભક્તવત્સલ પ્રિયકૈલાસ દયાસુધામ્બુધે ॥ ૧૯॥

સદુપાયકથાસ્વપણ્ડિતો હૃદયે દુઃખશરેણ ખણ્ડિતઃ ।
શશિખણ્ડશિખણ્ડમણ્ડનં શરણં યામિ શરણ્યમીશ્વરમ્ ॥ ૨૦॥

મહતઃ પરિતઃ પ્રસર્પતઃ તમસો દર્શનભેદિનો ભિદે ।
દિનનાથ ઇવ સ્વતેજસા હૃદયવ્યોમ્નિ મનાગુદેહિ નઃ ॥ ૨૧॥

ન વયં તવ ચર્મચક્ષુષા પદવીમપ્યમિત્રીક્ષિતું ક્ષમાઃ ।
કૃપયાઽભયદેન ચક્ષુપા સકલેનેશ વિલોકપાશુ મામ્ ॥ ૨૨॥

ત્વદનુસ્મૃતિરેવ પાવની સ્તુતિયુક્તા નહિ વક્તુમીશ સા ।
મધુરં હિ પયઃ સ્વભાવતો નનુ કીદૃક્સિતશર્કરાન્વિતમ્ ॥ ૨૩॥

સવિષોઽપ્યમૃતાયતે ભવાન્ શવમુણ્ડામરણોઽપિ પાવનઃ ।
ભવ એવ ભવાન્તકઃ સતાં સમદૃષ્ટિર્વિષમેક્ષણોઽપિ સન્ ॥ ૨૪॥

અપિ શૂલધરો નિરામયો દૃઢવૈરાગ્યરતોઽપિ રાગવાન્ ।
અપિ ભૈક્ષચરો મહેશ્વર ચરિતં ચિત્રમિદં હિ તે પ્રભો ॥ ૨૫॥

વિતરત્યભિવાઞ્છિતં નૃણાં પરિપૃષ્ટઃ કિલ કલ્પપાદપઃ ।
હૃદયે સ્વત એવ ધીમતે નમતેઽભીષ્ટફલપ્રદો ભવાન્ ॥ ૨૬॥

સહસૈવ ભુજઙ્ગપાશવાન્વિનિગૃહ્ણાતિ ન યાવદન્તકઃ ।
અભયં કુરુ તાવદાશુ મે ગતજીવસ્ય પુનઃ કિમૌપધૈઃ ॥ ૨૭॥

સવિષૈરિવ ભીમપન્નગૈઃ વિષયૈરેભિરલં પરીક્ષિતુમ્ ।
અમૃતૈરિવ સમ્ભ્રમેણ મામભિપિઞ્ચાશુ દયાવલોકનૈઃ ॥ ૨૮॥

મુનયો બહવોઽથ ધન્યતાં ગમિતાઃ સ્વાભિમતાર્થલાભતઃ ।
કરુણાકર યેન તેન મામવસન્નં નનુ પશ્ય ચક્ષુપા ॥ ૨૯॥

પ્રણમામ્યથ યામિ ચાપરં શરણં કં કૃપણાભયપ્રદમ્ ।
વિરહીવ વિભો પ્રિયામયં પરિપશ્યામિ ભવન્મયં જગત્ ॥ ૩૦॥

બહવો ભવતાઽનુકમ્પિતાઃ કિમિતીશાન ન માઽનુકમ્પસે ।
દધતા કિમુ મન્દરાચલં પરમાણુઃ કમઠેન દુર્ધરઃ ॥ ૩૧॥

અશુચિ યદિ માં નુ મન્યસે કિમિદં મૂર્ધ્નિ કપાલદામ તે ।
અથ શાઠ્યમસાધુસઙ્ગમં વિષલક્ષ્માસિ ન કિં દ્વિજિહ્વભૃત્ ॥ ૩૨॥

વિલુઠામ્યવનૌ કિમાકુલઃ કિમુગે હન્મિ શિરો ભિનદ્મિ વા ।
કિમુ રોદિમિ રારટીમિ વા કૃપણં માં ન યદીક્ષસે પ્રભો ॥ ૩૩॥

શિવ સર્વગ શર્વ સર્વતઃ પ્રણતો દેવ દયાં કુરુષ્વ મે ।
નમ ઈશ્વર નાથ દિક્પતે પુનરેવેશ નમો નમોસ્તુ તે ॥ ૩૪॥

ક્વ દૃશં વિદધામિ કિં કરોમ્યધિતિષ્ઠામિ કથં ભયાકુલઃ ।
કનુ તિષ્ઠસિ રક્ષ રક્ષ માં મયિ શમ્ભો શરણાગતોઽસ્મિ તે ॥ ૩૫॥

શરણં તરુણેન્દુશેખરઃ શરણં મે ગિરિરાજકન્યકા ।
શરણં પુનરેવ તાવુભૌ શરણં નાન્યદુપૈમિ દૈવતઃ ॥ ૩૬॥

પરલોકભયાત્પ્રતિક્ષણં મે હૃદયં મુહ્યતિ મુગ્ધચન્દ્રમૌલે ।
સદયં પરિગૃહ્ય સાધુ બન્ધો કુરુ માં નિર્ભયમર્ભકં ત્વદીયમ્ ॥ ૩૭॥

હર હર ભવ ભીમ ભર્ગ શમ્ભો ત્રિનયન રુદ્ર મહેશ વિશ્વ શમ્ભો ।
હર હર દુરિતં ત્રિશૂલપાણે શિવ શિવ શઙ્કર કિઙ્કરસ્તવાહમ્ ॥ ૩૮॥

યથા મૃકણ્ડોસ્તનયં યમારે યથૈવ પાણ્ડોસ્તનયં મખારે ।
યથા શિલાદસ્ય સુતં કૃપાબ્ધે તથૈત્ર માં પાહિ પિનાકપાણે ॥ ૩૯॥

- -

સૂતઃ - (ફલમ્)
ઉપમન્યુકૃતં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥ ૪૦॥

તત્સ્તુત્યા મોદિતઃ શમ્ભુઃ તં પ્રાહ વિનયાનતમ્ ।
દેવ્યાઃ પશ્યન્મુખામ્ભોજં ગણાનાં પશ્યતાં તદા ॥ ૪૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવાખ્યે ઉપમન્યુકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શિવાખ્યઃ ચતુર્થાંશઃ । અધ્યાયઃ ૧૨ । ૧૯-૪૧॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 12 . 19-41..

Notes: Upamanyu ઉપમન્યુ eulogizes Śiva શિવ who appears to him, after due penance.

Proofread by Ruma Dewan

---

*Upamanyukritam Shiva Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*